कृदन्तसामान्यम् । उपशास्त्री II 21-08-2020

वार्यपत्रम् ।

तद्धितप्रत्ययान्त शब्दस्य रूपसिद्धिः ।

# आश्वपतम् ।

लौकिकविग्रहः → अश्वपतेरपत्यम् अश्वपतेरिदम् वा ।
अलौकिक वि० → अश्वपति ङस् + अण् (अ) ।

अश्वपत्यादिभ्यश्च सूत्रेण अश्वपतेरपत्यमस्मिन्नर्थे अण् प्रत्ययः भूत्वा अश्वपति ङस् अण् (अ) ।
कृत्तद्धितसमासाश्च सूत्रेण प्रातिपदिक संज्ञा ।
सुपोधातुप्रातिपदिकयोः सूत्रेण 'सुप्' इत्यस्य लोपः → अश्वपति अण् ।
हलन्त्यम् सूत्रेण अनुत्तरवर्ती णकारस्य लोपः → अश्वपति अ ।
तद्धितेष्वचामादेः सूत्रेण आदि अच् वृद्धिः → आश्वपति अ ।
यस्येति च सूत्रेण अन्त्य इकारस्य लोपः → आश्वपत् अ ।
इत्यस्मिन् अवस्थायां प्रथमा एकवचने 'स्वौजसमौट्०' सूत्रेण सु प्रत्ययः → आश्वपत सु ।
अतोऽम् सूत्रेण 'सु' इत्यस्य अमादेशः → आश्वपत अम् ।
अमिपूर्वः सूत्रेण 'अम्' इत्यस्य अकारस्य पूर्वरूपं भूत्वा →
आश्वपतम् ।

21-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्यपत्रम्। शास्त्री - II 21-08-2020

व्याकरणछात्रेभ्यः। रघुवंशम्।

श्लोकव्याख्या।

जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः।
अतिष्ठदेकोनशतक्रतुत्वे शक्राभ्यसूयाविनिवृत्तये यः॥ "

सन्दर्भः → पूर्ववत्।

प्रसङ्गः → अत्र कविः इक्ष्वाकुकुलश्रेष्ठदिलीपस्य महत्वं उपस्थापयति।

अन्वयः → उरुकीर्तिः कुलप्रदीपः नृपतिः दिलीपः तस्य कुले जातः किल यः शक्राभ्यसूयाविनिवृत्तये एकोनशतक्रतुत्वे अतिष्ठत्।

शब्दार्थः व्याकरणञ्च → उरुकीर्तिः = श्रेष्ठयशः। कुलप्रदीपः = वंशप्रकाशकः। नृपतिः = राजा। तस्य = ककुत्स्थस्य। कुले = वंशे। जातः = उत्पन्नः। किल = खलु। यः = दिलीपः। शक्राभ्यसूयाविनिवृत्तये → शक्रस्य अभ्यसूयया विनिवृत्तिः, तस्यै। = इन्द्रेर्ष्यावारणाय। एकोनशतक्रतुत्वे → एकेन ऊनाः शतक्रतवो यस्य सः, तस्य भावः, तस्मिन् = नवनवतियज्ञत्वे। उरुकीर्तिः = उरुः कीर्तिः यस्य सः = श्रेष्ठयशः।

तात्पर्यः → ककुत्स्थवंशीयः राजा दिलीपः शताश्वमेधं कर्तुं समर्थः सन् तथापि इन्द्रस्य इर्ष्यां अपाकर्तुं नवनवतियज्ञमेव कृतवान्।

विशेषः → शृङ्गाररसः। वैदर्भीरीतिः। माधुर्य गुणः। अनुप्रासालङ्कारः। उपजातिछन्दश्च।

21-08-2020

डॉ॰ निर्मल कुमार झा (स॰ प्राचार्य)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ

21-08-2020

संस्कृतसामान्यम् ।

अनिवार्यपत्रम् ।

उपशास्त्री I

संस्कृतानुवादम् कुरुत ।

1. पढाई में आलस्य मत करो → स्वाध्यायात् मा प्रमद ।
2. सूर्यास्त होने पर लड़के मैदान से घर गए →
(अस्तं गते) सूर्यास्ते बालका: क्षेत्रात् गृहं गतवन्त: ।
सूर्यास्ते बालकै: क्षेत्रात् गृहं गतम् ।
3. मेरे वर्ग में पन्द्रह छात्र पढते हैं → मम कक्षायां पञ्चदश छात्रा: पठन्ति ।
4. राम के साथ सीता भी वन गई → रामेण सह सीताऽपि वनं गतवती । रामेण सह सीता अपि वनं गता ।
रामेण सह सीतया अपि वनं गतम् ।
5. तुमने कब पुस्तक पढी? → त्वं कदा पुस्तकं अपठ: ?
त्वं कदा पुस्तकं पठितवान् ? त्वया कदा पुस्तकं पठितम् ?
6. उन सब में नरेन्द्र मेधावी है → तेषां तेषु वा नरेन्द्र: मेधावी अस्ति ।
7. काशी गंगा के किनारे है → काशी गङ्गातटे (अवस्थिता) अस्ति ।
8. काशी में विश्ववि० है → काश्यां विश्वविद्यालय: अस्ति ।
9. वह चावल से भात पकाती (बनाती) है → सा तण्डुलान् ओदनं पचति ।
10. किसान गाँव से बैल ले जाता है → कृषक: ग्रामात् अजां नयति ।
11. ग्वाला गाय से दूध दुहता है → गोप: गां दुग्धं दोग्धि ।
गोप: गो: दुग्धं दोग्धि ।
12. बलि से पृथ्वी की याचना करता है - बले: बलिं वा भिक्षते (याचते) वसुधाम् ।

21-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य) ।